नदीजः ४। अस्य गुणाः। तिक्तत्वम्। कटुत्वम्। अस्रप्रदत्वम्। गुरुत्वम्। वातलत्वम्। कफदत्वम्। रूक्षत्वम्। कषायत्वम्। विषदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

नदीमातृकः, त्रि, (नदी मातेव पोषिका यस्य। कप्।) नद्यम्बुसम्पन्नव्रीहिपालितदेशः। इत्यमरः। २।१।१२॥

नदीवङ्कः, पुं, (नद्या वङ्कः।) वङ्कुरः। इति शब्दमाला॥ बाँक इति भाषा॥

नदीवटः, पुं, (नदीसमीपजातो वटः।) वटीवृक्षः। इति राजनिर्घण्टः॥

नदीष्णः, त्रि, (नद्यां स्नातीति। स्ना+ "सुपि स्थः।"३।२।४। इति कः। "निनदीभ्यां स्नातेः कौशले।" ८।३।८९। इति षत्वम्।) नद्यवगाहनदक्षः। नदीस्नानेकुशलः। इति भट्टिटीकायां पुण्डरीकाक्षः॥ नदीज्ञः। इति पुरुषोत्तमः॥ यथा,—

"ततो नदीष्णान् पथिकान् गिरिज्ञान्॥"

इति भट्टिः॥

नदीसर्ज्जः, पुं, (नद्याः सर्ज्ज इव। नदीतीरजातत्वादस्य तथात्वम्।). अर्ज्जुनवृक्षः। इत्यमरः। २।४।४५॥ (पर्य्यायोऽस्य यथा,—

"ककुभोऽर्ज्जुननामाख्यो नदीसर्ज्जश्च कीर्त्तितः।
इन्द्रद्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नदेयी, स्त्री, (नद्यां भवा। "नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक्। पृषोदरादित्वात् ह्रस्वः।) नादेयी। भूमिजम्बुः। इति शब्दचन्द्रिका॥

नद्धः, त्रि, (नह्यते स्मेति। नह+क्तः।) बद्धः। (यथा, हरिवंशे। २३२।१७।

"दिव्यैश्च कवचैर्नद्धा दिव्यैश्चैवोच्छ्रितैर्ध्वजैः॥")

उद्वृत्तः। इति मेदिनी। धे, ९॥

नद्ध्री, स्त्री, (नह्यतेऽनया। नह+दाम्नीति ष्ट्रन्। ततो ङीप्।) चर्म्मरज्जुः। इत्यमरः।२।१०।३२॥ (यथा, प्रद्युम्नविजये चतुर्थाङ्के।

"अद्यापि धिग्जनुषि पुत्त्रकलत्रमित्र-
नद्ध्रीवनद्धहृदयो न च तं स्मरामि॥")

नद्याम्रः, पुं, (नद्या आम्र इव।) समष्ठिलावृक्षः। इति राजनिर्घण्टः॥

नद्युत्सृष्टः, त्रि, (नद्या उत्सृष्टः।) नदीकर्त्तृकव्यक्तवस्तु। तद्रूपभूखण्डस्य चर इति चड़ा इति च भाषा॥ नद्युत्सृष्टा भूमिस्तु यस्याधिकारे जाता तस्यैव भवति। यथा,—

"नद्युत्सृष्टा राजदत्ता यस्य तस्यैव सा मही।
अन्यथा न भवेल्लाभो नराणां राजदैविकः॥
क्षयोदयौ जीवनञ्च दैवराजवशान्नृणाम्।
तस्मात् सर्व्वेषु कार्य्येषु तत्कृतं न विचालयेत्॥"

इति विवादचिन्तामणिविवादरत्नाकरवीरमित्रोदयप्रभृतिग्रन्थधृतवचनम्॥

ननन्दा, [ऋ] स्त्री, (न नन्दति तुष्यति सेवयापि। नञ्+नन्द+"नञि च नन्देः।" उणां २।९९। इति ऋन्। केशाश्चिन्मतेन वृद्धाभावः।) भर्त्तृभगिनी। ननद इति भाषा॥ तत्पर्य्यायः। ननान्दा २ नन्दिनी ३ नन्दा ४ पतिस्वसा ५। इति शब्दरत्नावली॥

ननान्दा, [ऋ] स्त्री, (न नन्दति सेवयापि। नन्द+"नञि च नन्देः।" उणां २।९९। इति ऋन् वृद्धिश्च।) ननन्दा। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे। १०।८५।४६।

"सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु॥")

ननु, व्य, (न नुदति प्रेरयतीति। नुद+मितद्र्वादित्वात् डुः।) प्रश्नः। पृच्छा। अवधारणम्। (यथा, रघुः। १।६०।

"उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे।
दैवीनां मानुषीणाञ्च प्रतिहर्त्ता त्वमापदाम्॥")

निश्चयः। (यथा, महाभारते। १३।६।१९।

"लोको दैवं समालोक्य उदासीनो भवेन्ननु॥")

अनुज्ञा। (यथा, शिशुपालवधे। ९।६१।

"ननु सन्दिशेति सुदृशोदितया
त्रपया न किञ्चन किलाभिदधे॥")

अनुमतिः। अनुनयः। सान्त्वनम्। आमन्त्रणम्। सम्बोधनम्। (यथा, कुमारे। ४।३२।

"विधुरां ज्वलनातिसर्ज्जनात्
ननु मां प्रापय पत्युरन्तिकम्॥")

एषामुदाहरणानि यथा,—

"प्रश्ने नन्वधीयामहे। अवधारणे ननु गच्छामः। अनुज्ञायां सर्व्वैर्ननु श्रूयताम्। अनुनये ननु चण्डि! प्रसीद। आमन्त्रणे ननु चैत्र। विरोधोक्तिः। इत्यमरभरतौ॥ विनिग्रहः। अनुप्रश्नः। परकृतिः। अधिकारः। सम्भ्रमः। इति मेदिनी। ने, ४४॥ आक्षेपः। प्रत्युक्तिः। वाक्यारम्भः। इति हेमचन्द्रः। ६।१७८॥ उत्प्रेक्षालङ्कारव्यञ्जकम्। यथा,—

"मन्ये शङ्के ध्रुवं नूनं किंवा प्रायोऽनुवेद्मि च।
ननु नाम हि जानामि उत्प्रेक्षाव्यञ्जकानि च॥"

इति काव्यचन्द्रिका॥

ननुच, व्य, विरोधोक्तिः। इत्यमरः।३।४।१४॥ ननुचेति समुदितं विरोधवचने ननुशब्दो विरोधोक्तौ चकारात् ननुचेति वा। इति भरतः॥

नन्दः, पुं, (नन्दतीति। नन्द+पचाद्यच्।) विष्णुः। यथा। "आनन्दो नन्दनो नन्दः।" इति महाभारते। १३।१४९।६९॥ नरपतिभेदः। स तु महानन्दिसुतः क्षत्त्रियवंशान्तः। (यथा, भागवते। १२।१।७—११।

"महानन्दिसुतो राजन्! शूद्रागर्भोद्भवो बली।
महापद्मपतिः कश्चिन्नन्दः क्षत्त्रविनाशकृत्।
ततो नृपा भविष्यन्ति शूद्रप्रायास्त्वधार्म्मिकाः॥
स एकच्छत्त्रां पृथिवीमनुल्लङ्घितशासनः।
शासिष्यति महापद्मो द्वितीय इव भार्गवः॥
तस्य चाष्टौ भविष्यन्ति सुमाल्यप्रमुखाः सुताः।
य इमां भोक्ष्यन्ति महीं राजानश्च शतं समाः॥
नव नन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति।
तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ॥")

आनन्दः। निधिविशेषः। इति पुराणशब्दरत्नावल्यौ॥ गोपभेदः। स च श्रीकृष्णपिता। नन्दः पुरा द्रोणनामा वसुरासीत्। यथा,—

"द्रोणो वसूनां प्रवरो धरया सह भार्य्यया।
करिष्यमाण आदेशान् ब्रह्मणस्तमुवाच ह॥
जातयोर्नौ महादेवे भुवि विश्वेश्वरे हरौ।
भक्तिः स्यात् परमा लोके ययाञ्जो दुर्गतिन्तरेत्॥
अस्त्वीत्युक्तः स भगवान् व्रजे द्रोणो महायशाः।
जज्ञे नन्द इति ख्यातो यशोदा सा धराभवत्॥"

इति श्रीभागवते। १०।८।४८-५०॥

वेणुविशेषः। यथा,—

"महानन्दस्तथा नन्दो विजयोऽथ जयस्तथा।
चत्वार उत्तमा वंशा मातङ्गमुनिसम्मताः॥
दशाङ्गुलो महानन्दो नन्द एकादशाङ्गुलः॥"

इति सङ्गीतदामोदरः॥

(मृदङ्गविशेषः। यथा, महाभारते।७।२२।८५।

"मृदङ्गौ चात्र विपुलौ दिव्यौ नन्दोपनन्दकौ॥"

स्कन्दस्यानुचरविशेषः। इति महाभारते। ९। ४५।६१॥ नागविशेषः। इति महाभारते। ५। १०३। १२॥ यज्ञेश्वरस्यानुचरविशेषः। यथा, भागवते। ४।७।२२।

"दृष्टो गृहीतार्हणसादनोत्तमं
यज्ञेश्वरं विश्वसृजां परं गुरुम्।
सुनन्दनन्दाद्यनुगैर्वृतं मुदा
गृणन् प्रपेदे प्रयतः कृताञ्जलिः॥"

धृतराष्ट्रस्य पुत्त्राणामन्यतमः। इति महाभारतम्। १। ६७। ९६। मदिरागर्भजातो वसुदेवस्य पुत्त्रविशेषः। इति भागवतम्। ९। २४। ४८॥ क्रौञ्चद्वीपस्य वर्षपर्व्वतविशेषः। इति भागवतम्। ५। २०। २१॥ स्वनामख्यातो दत्तकमीमांसाग्रन्थप्रणेता। यथा,—

"अभिवन्द्य जगद्वन्द्यपदद्वन्द्वविनायकम्।
पुत्त्रीकरणमीमांसां कुरुते नन्दपण्डितः॥")

नन्दकः, पुं, (नन्दयतीति। नन्द+ण्वुल्।) विष्णुखड्गः। इत्यमरः। १।१।३०॥ (यथा, हरिवंशे। १२७।४४।

"रथाङ्गेनाथ शार्ङ्गेण गदया नन्दकेन च।
प्रहरारुह्य गरुड़ं हृष्टो भूत्वा जनार्द्दन!॥")

भेकः। इति त्रिकाण्डशेषः॥ हर्षके कुलपालके च त्रि। इति मेदिनी। के, १०९॥ कृष्णपिता आनन्दः। आनन्दकारकश्च॥ (नागविशेषः इति महाभारतम्। ५।१०३।११॥ स्कन्दस्यानुचरविशेषः। इति महाभारतम्। ९। ४५।६६॥ धृतराष्ट्रस्य पुत्त्रविशेषः। इति महाभारतम्। १। १८७।३॥)

नन्दकिः, स्त्री, पिप्पली। इति शब्दचन्द्रिका॥

नन्दकी, [न्] पुं, (नन्दकः खड्गोऽस्यास्तीति। नन्दक+इनिः।) विष्णुः। यथा,—

"शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः॥"

इति महाभारते शान्तिपर्व्व॥

नन्दगोपिता, स्त्री, (नन्दाय हर्षाय गोपिता रक्षिता।) रास्ना। इति शब्दचन्द्रिका॥